॥ श्रीदिग्विजयमूलरामौ विजयेते ॥

श्रीमत्सत्यात्मस्तुतिबन्धः



स्तोत्रकर्ता
पुरोहित भीमसेनः, हरिहर

॥ श्रीदिग्विजयमूलरामौ विजयेते ॥

श्रीमत्सत्यात्मस्तुतिबन्धः

स्तोत्रकर्ता
पुरोहित भीमसेनः, हरिहर

Rarest Archiver

ಗ್ರಂಥದ ಹೆಸರು :
ಶ್ರೀಮತ್ಸತ್ಯಾತ್ಮಸ್ತುತಿಬಂಧಃ

ಪ್ರಕಾಶನ :
ಸಾತ್ಯವತೇಯಸಮಯಾಲಯಃ, ಹರಿಹರಕ್ಷೇತ್ರ
ಹಾಗೂ ಶ್ರೀಮಾಧ್ವಸಂಘ, ಕೋಟೆ, ಹರಿಹರ

ಪ್ರತಿಗಳು : 150

ಪ್ರಥಮ ಮುದ್ರಣ : 2014

ಅಕ್ಷರ ಜೋಡಣೆ ಹಾಗು ಮುಖಪುಟ ವಿನ್ಯಾಸ :
ವಾಗೀಶ ಚನ್ನಗಿರಿ, ದಾವಣಗೆರೆ.

Rarest Archiver

॥ श्रीपतिर्मानदो नः ॥

ಪಂಡಿತ. ಡಾ॥ ಶ್ರೀಸತ್ಯಧ್ಯಾನಾಚಾರ್ಯ ಕಟ್ಟಿ
ಉಪಕುಲಪತಿಗಳು, ಶ್ರೀಜಯತೀರ್ಥ ವಿದ್ಯಾಪೀಠ
ಶ್ರೀಮದುತ್ತರಾದಿಮಠ, ಬೆಂಗಳೂರು–4

ಪಂಡಿತರಾದ ಶ್ರೀವರದಾಚಾರ್ಯ ಪುರೋಹಿತ ಇವರ ಪುತ್ರರಾದ ಭೀಮಸೇನ ಪುರೋಹಿತ ಇವರು, ಲೌಕಿಕ ವಿದ್ಯೆಯನ್ನು ಅಧ್ಯಯನ ಮಾಡಿ, ವೈದಿಕ ವಿದ್ಯೆಯನ್ನು ತಮ್ಮ ತಂದೆಯವರಲ್ಲಿಯೇ ಅತ್ಯಂತ ಭಕ್ತಿ ಶ್ರದ್ಧೆಯಿಂದ ಅಧ್ಯಯನ ಮಾಡುತ್ತಿರುವುದು ಪ್ರಶಂಸನೀಯವಾಗಿದೆ.

ಸಾಹಿತ್ಯ ಶಾಸ್ತ್ರ ಹಾಗೂ ವ್ಯಾಕರಣ ಶಾಸ್ತ್ರವನ್ನು ಬಲ್ಲವರಾಗಿ ಈಗಾಗಲೇ ಅನೇಕ ಶ್ಲೋಕಗಳನ್ನು ಅಲಂಕಾರಪೂರ್ವಕವಾಗಿ ರಚನೆ ಮಾಡಿದ್ದಾರೆ.

ಪ್ರಸ್ತುತ, ಶ್ರೀಪಾದಂಗಳವರ ಅನುಗ್ರಹದಿಂದ "ಶ್ರೀಮತ್ಸತ್ಯಾತ್ಮಸ್ತುತಿಬಂಧಃ" ಎನ್ನುವ ಐದು ಶ್ಲೋಕಗಳಿಂದ ಕೂಡಿದ ಈ ಸ್ತುತಿಯನ್ನು ಸ್ವವ್ಯಾಖ್ಯಾನಸಹಿತವಾಗಿ ರಚನೆ ಮಾಡಿರುವುದು ನಮಗೆ ಸಂತೋಷವನ್ನು ಉಂಟುಮಾಡಿದೆ. ಅಷ್ಟೇ ಅಲ್ಲದೆ, ಸಾಮಾನ್ಯವಾಗಿ ಬಂಧ ಶ್ಲೋಕಗಳಲ್ಲಿ ದೂರಾನ್ವಯವಿರುವುದು ಸಹಜ. ಆದರೆ ಈ ಸ್ತುತಿಬಂಧದಲ್ಲಿ ಕ್ರಮವಾಗಿ ಅನ್ವಯವಿರುವಂತೆ ರಚನೆ ಮಾಡಿದ್ದಾರೆ.

ಈ ಸ್ತೋತ್ರ ಪಂಡಿತರಿಗಷ್ಟೇ ಅಲ್ಲದೆ ಮಕ್ಕಳಿಗೂ ಕೂಡ ತಿಳಿಯುವಂತೆ ವ್ಯಾಕರಣ ಸೂತ್ರಗಳನ್ನು ಉದಾಹರಿಸಿ, ಅಮರಕೋಶದ ಶ್ಲೋಕಗಳನ್ನು ಆಯಾ ಪದಗಳಿಗೆ ಸಂಬಂಧ ಪಟ್ಟಂತೆ ಉದಾಹರಿಸಿ ರಚಿಸಿದ್ದಾರೆ. ಛಂದಸ್ಸಿನ ಲಕ್ಷಣಗಳೂ ಇಲ್ಲಿ ಉದಾಹರಿಸಲ್ಪಟ್ಟಿವೆ.

ಇಂತಹ ಭೀಮಸೇನ ಪುರೋಹಿತ ಇವರಿಗೆ ಸರ್ವಾಂತರ್ಯಾಮಿಯಾದ ಭಗವಂತನು ಸರ್ವವನ್ನು ಕರುಣಿಸಿ ಉತ್ತರೋತ್ತರ ಅಭಿವೃದ್ಧಿಯಾಗುವಂತೆ ಅನುಗ್ರಹಿಸಲಿ ಎಂದು ಶ್ರೀಹರಿವಾಯುಗುರುಗಳಲ್ಲಿ ಪ್ರಾರ್ಥಿಸುತ್ತೇವೆ..

ಪಂಡಿತ.ಡಾ॥ ಶ್ರೀ ಸತ್ಯಧ್ಯಾನಾಚಾರ್ಯ ಕಟ್ಟಿ

Rarest Archiver

श्रीमत्सत्यात्मस्तुतिबन्धः

श्रीशं केशं भृशं दिग्विजयजलजनेत्रालयं लब्धलङ्कं
रामं धीमंतमंशुप्रकरकलिकविं हासदासप्रसन्नं ।
न्यूनाज्ञानाप्तनारायणगुणगणभान् व्यासमासन्नसत्या-
त्मो भूयात् भूरिभूतिप्रदहृदयदयी लोपतापप्रपन्ने ॥१॥
वृत्तं– स्रग्धरा बन्धः– हारबन्धः

मध्वमग्नो महीमह्यो मठमण्ठो महामणः
मन्युमन्त्रो मतिं मङ्खु मत्तां मध्वमते मम ॥२॥
वृत्तं– पथ्यावक्त्रं बन्धः– षोडशदलपद्मबन्धः

जितं सोऽहमित्यलं जापनं भवाब्धिजं सदा
रामाङ्घ्री तिलितौ यस्मात् यतिराजं भजामि तं ॥३॥
वृत्तं– युग्मविपुला बन्धः– मुकुटबन्धः

प्रातर्वेदसुधाबोधे स्वाश्रमक्रममञ्चने
विष्वंककरणे दक्षं स्वकीययमनेऽनिशं ॥४॥
वृत्तं– पथ्यावक्त्रं बन्धः– शरबन्धः

हिमांशोर्मोदने शोभा भास्करी तमसोऽदने
नेह लब्धसमा गृह्यात् निजदासकुलेऽपि मां ॥५॥
वृत्तं– पथ्यावक्त्रं बन्धः– धनुर्बन्धः

स्तोत्रसन्नहनं भद्रं श्रीसत्यात्मपदांकितं ।
पायात् सर्वदा सुधरं गुर्वनुग्रहकांक्षिणं ॥

॥ इति श्रीमत्सत्यात्मस्तुतिबंधः समाप्तः ॥

***** ***** ***** ***** ***** *****

Rarest Archiver

श्रीशं केशं भृशं दिग्विजयजलजनेत्रालयं लब्धलङ्कं
रामं धीमंतमंशुप्रकरकलिकविं हासदासप्रसन्नं ।
न्यूनाज्ञानाप्तनारायणगुणगणभान् व्यासमासन्नसत्या-
त्मो भूयात् भूरिभूतिप्रदहृदयदयी लोपतापप्रपन्ने ॥१॥

श्रीशमिति । श्रियः लक्ष्म्याः ईशः तं । अत्र श्रीशब्दप्रयोगेणैव अस्य मङ्गलत्वमुक्तमिति । कस्य ब्रह्मणः ईशः तं । "मारुते वेधसि ब्रध्ने पुंसि कः" इत्यमरः । चतुर्मुखब्रह्मकरार्चितमिति यावत् । जलजवत् नेत्रे यस्याः सा जलजनेत्रा सीता । दिग्विजयः रामश्च जलजनेत्रा च । तयोः आलयः मन्दिरं यः सः। दिग्विजयरामसीताभ्यां समन्वितः इति यावत् । अथवा जलजनेत्रायाः आलयः निकाय्यः यस्मिन् सः । "निकाय्यनिलयालयाः" इत्यमरः । दिग्विजयश्चासौ जलजनेत्रालयश्चेति कर्मधारयः । तं । लब्धा प्राप्ता जितेति यावत् लङ्का येन सः तं । "स्त्रियाः पुंवद्भाषितपुंस्कादि"त्यनेन पुंवद्भावः । धीमन्तं ज्ञानात्मकशरीरं । "धीः प्रज्ञा शेमुषी मतिः"इत्यमरः । "तदस्यास्त्यस्मिन्निति मतुप्"इत्यनेन मतुबन्तः । रामं श्रीमूलरामं । यद्वा विशेषणभेदेन प्रत्येकं मूलरामः दिग्विजयरामः वंशरामः ग्राह्याः ।

अंशूनां किरणानां प्रकरः समूहः यस्य स तथोक्तः सूर्यः । "किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः" इत्यमरः । अंशुप्रकरः अस्यास्तीति अंशुप्रकरः सूर्यवंशः । "अर्शआदिभ्योऽच्" इत्यनेन अजन्तः । यद्वा "तद्गतत्वात् तदभिन्नत्वाच्च तत्तदेव भण्यते" इति वचनाद्वा नामैकदेशग्रहणन्यायाद्वा सूर्यार्थबोधकांशुप्रकरशब्देन सूर्यवंशोऽपि ग्रहीतुं शक्यते । तस्मिन् वंशे विद्यमानेषु कलिषु पराक्रमशालिषु कविः श्रेष्ठः "संख्यावान् पण्डितः कविः" इत्यमरः । अत्र सूर्यवंशस्योल्लेखितत्वात् वंशरामः ज्ञेयः । तं । हासेन स्वस्य मन्दहासेन दासानां भक्तानां प्रसन्नः तं प्रसन्नविठ्ठलं इति यावत् । यद्वा हासेन भक्त्याद्यतिशयोद्गतानन्देन वर्तमानाः ये दासाः तेषामेव प्रसन्नः । "भक्तैकलभ्यः पुरुषोत्तमोऽसि" इति पञ्चरात्रोक्तेः । तं ।

न्यूनं अज्ञानं यस्य सः न्यूनाज्ञानः । निर्गताज्ञानः श्रीपूर्णप्रज्ञः इति । ननु न्यूनमिति पदं अल्पत्वद्योतकं । तथात्वे एवं विग्रहे ईषदपि अज्ञानं वर्तते इत्युक्तं भवति । तत्कथमिति चेत् । सत्यं । ऋजुयोगिज्ञानापेक्षया इदमुक्तमित्यदोषः । यथोक्तं पद्धतौ "ईश्वरादन्यत्र आलोचने सार्वविषयकं ज्ञानं ऋजुयोगिज्ञानं"इति। तथा हि भगवद्विषयकाज्ञानं अस्त्येव । तत्तु न ज्ञानं अज्ञानमिति नञ्तत्पुरुषः न। किन्तु अकृतं ज्ञानं अज्ञानं इति प्रादिसमासः । सदा हरिगुणचिन्तनरतत्वेऽपि सर्वगुणज्ञानं अकृतं । तादृशं अज्ञानमपि न्यूनं अस्मदपेक्षया यस्य सः पूर्णप्रज्ञः । अथवा ऊनं अल्पं । नीत्युपसर्गः ।
"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा ॥" इति वचनात् नि नितरां ऊनं निःशेषीकृतं अज्ञानं यस्य सः इति समासे न कोपि दोषः । यद्वा न्यूनं भवति

Rarest Archiver

अस्माकमज्ञानं येन सः । यच्छास्त्रश्रवणेन यदाश्रयणेन च अस्माकमज्ञानं प्रणश्यति स तथोक्तः श्रीमध्वः । तेन अप्ताः प्राप्ताः । नारायणश्चासौगुणगणश्च नारायणगुणगणः । तस्य भा दीप्तिः सन्निधानमिति यावत् येषां ते नारायणगुण-गणभाः तान् । भा-दीप्तौ इत्यस्माद्धतोः रूपं ।"स्युः प्रभारुग्रुचि स्त्विड्भाभाश्छविद्युतिदीप्तयः" इत्यमरः । नन्वत्र गुणगणपदस्य विशेषणत्वात् "विशेषणं विशेष्येण बहुलं" इति सूत्रानुसारेण पूर्वनिपातः कर्तव्यः इति चेत् मयूरव्यंसकादिशब्दवत् विशेषणोत्तरपदकर्मधारयसमासः इति ज्ञेयं । यद्वा "समासान्तः नियमः अनित्यः"इत्युक्तत्वात् न दोषः । अथवा गुणगणेति पदं भाशब्दस्यविशेषणं । गुणगणभरिता भा येषु ते गुणगणभाः । नारायणस्य गुण-गणभाः तान् । मध्वाचार्यैः प्राप्तान् नारायणस्य सन्निधानविशेषयुक्तान् व्यासमुष्टिकान् इति लब्धोर्थः । तदुक्तं सुमध्वविजये

"प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः ।
यासु स पद्मासहितो दोष्यहितः सन्निहितः ॥" इति ।

एतान् सीतासमेतमूलरामदिग्विजयरामवंशरामप्रसन्नविठ्ठलव्यासमुष्टिकादिकान् व्यासमासन्नः वि-आङ्-सं इत्युपसर्गत्रयपूर्वकः आसन्नः । संनिकृष्टः समाश्रितः इत्यर्थः । "समीपेनिकटासन्नसंनिकृष्टसनीडवत्" इत्यमरः । स चासौ सत्यात्मश्च । अथवा व्यासं आसन्नसत्यात्मः इति पदच्छेदः । ग्रन्थरू-पस्थवेद व्यासं इत्यर्थः । यद्वा व्यासकृतब्रह्मसूत्रमित्यपि ग्राह्यं । "आर्थिकपुनरुक्तेः स्तुतित्वमेव समाधानमवधातव्यं" इति न्यायसुधोक्तेः नात्राधिक्यदोषः । ननु "समर्थः पदविधिः" इत्यनेन पदविधिः समर्थाश्रितः इति सिद्धत्वात् आसन्नः इत्यत्र आकांक्षात्वेन असमर्थत्वात् कथं सत्यात्मशब्देन समासः कृतः इति चेत् नित्यसापेक्षत्वात् समासः युक्तः। आसन्न इत्यत्र किं आसन्नः इति नित्यसापेक्षत्वात् देवदत्तस्य गुरुकुलमितिवत् समासः अदोषः ।

भूरिभूतिप्रदहृदयदयी भूरिः भूयिष्ठा भूतिः ऐश्वर्यम् संपदिति यावत् । "पुरूहुः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च" इत्यमरः । "विभूतिर्भूतिरैश्वर्य मणिमादिकमष्टधा" इत्यमरः । संपदित्यनेन ज्ञानसंपदेव ग्राह्या । "सुवुद्याद्गविणद" इति वायुस्तुत्युक्तेः। तां प्रयच्छतीति भूरिभूतिप्रदः । तादृशः हृदयं मनः यस्य सः भूरिभूतिप्रदहृदयः । "चित्तं तु चेतो हृदयं स्वान्तम् हृन्मा-नसं मनः" इत्यमरः । दया कृपा अस्यास्तीति दयी । "कृपा दयानुकंपा" इत्यमरः।"अत इनिठनौ" इत्यनेन इनिप्रत्ययान्तः । भूरिभूतिप्रदहृदयश्चासौ दयी च । भृशं अतिशयेन "अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं" इत्यमरः । भूयात् भू-सत्तायां इत्यतः कर्तरि आशीर्लिङ् परस्मैपदं भूयात् भूयास्तां भूयासुः । मयि दयान्तःकरणः भूयात् इति । कीदृशे मयि लोपतापप्रपन्ने । लोपस्य ज्ञानलोपस्य तापः। तेन कारणेन प्रपन्नः शरणागतः । तस्मिन् मयि । स्रग्धरावृत्तं "म्रभ्नैर्याणां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं"इति तल्लक्षणात् । एवं च शुभसंपत्करोऽयं स्तुतिबन्धः। मगणेनारब्धत्वात् । तदुक्तं कृष्णावधूतीये "मस्य भूमिर्देवतास्यात् संपत्तिः फलमिष्यते" इति॥

Rarest Archiver

जलजनेत्रा इत्यत्र धर्मोपमानवाचकलुप्तोपमालंकारः । तथा च श्रीशं केशं भृशं इत्यादिषु वृत्यनुप्रासनामो शब्दालंकारः । *हारबन्धे रचितोऽयं श्लोकः ।*

ಲಕ್ಷ್ಮೀದೇವಿಯ ಒಡೆಯನಾದ, ಚತುರ್ಮುಖ ಬ್ರಹ್ಮಕರಾರ್ಚಿತನಾದ ಶ್ರೀದಿಗ್ವಿಜಯರಾಮ ಹಾಗೂ ಕಮಲನಯನೆ ಸೀತಾದೇವಿಯರಿಂದೊಡಗೂಡಿದ, ಧೀಮಂತನಾದ, ಶ್ರೀಮೂಲರಾಮದೇವರನ್ನು, ಲಂಕೆಯನ್ನು ಗೆದ್ದ, ಸೂರ್ಯವಂಶದ ಚಕ್ರವರ್ತಿಗಳಲ್ಲೇ ಅತಿಶ್ರೇಷ್ಠನಾದ ಶ್ರೀವಂಶರಾಮಚಂದ್ರದೇವರನ್ನು, ತನ್ನ ಮಂದಹಾಸದಿಂದಲೇ ಭಕ್ತರಿಗೆ ಪ್ರಸನ್ನತೆಯನ್ನೀಯುವ ಶ್ರೀಪ್ರಸನ್ನವಿಠ್ಠಲ ದೇವರನ್ನು, ಶ್ರೀಪೂರ್ಣಪ್ರಜ್ಞರಿಂದ ಪಡೆಯಲ್ಪಟ್ಟ ವ್ಯಾಸಮುಷ್ಟಿಗಳನ್ನೂ ನಿತ್ಯದಲ್ಲಿ ಆಶ್ರಯಿಸಿ ಪೂಜೆಗೈಯುವ ಶ್ರೀಸತ್ಯಾತ್ಮತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರು, ಅಜ್ಞಾನದ ತಾಪದಲ್ಲಿ ಬೆಂದು ಬಳಲಿದ ನನ್ನಲ್ಲಿ ಸುಜ್ಞಾನವನ್ನು ದಯಪಾಲಿಸುವ ಹೃದಯವುಳ್ಳವರಾಗಲಿ ಎಂದು ತಾತ್ಪರ್ಯ..

ಈ ಶ್ಲೋಕವು "ಹಾರಬಂಧ"ದಲ್ಲಿ ರಚಿತವಾಗಿದ್ದು, "ಸ್ರಗ್ಧರಾ"ವೃತ್ತದಲ್ಲಿದೆ..

मध्वमग्नो महीमह्यो मठमण्ठो महामणः
मन्युमन्त्रो मतिं मङ्खु मत्तां मध्वमते मम ॥२॥

मध्वेति । मध्वे मध्वशास्त्रे मग्नः रतः श्रीमत्सत्यात्मतीर्थः । मह्यां पृथिव्यां "गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही" इत्यमरः अस्मिन् जगतीति यावत् मह्यः पूज्यः मह–पूजायामित्यतः कृदन्तः । अनेन जगद्गुरुत्वमुक्तं । मठि–पालने इत्यतः मण्ठते पालयति इति मण्ठः । मठं मण्ठते इति मठमण्ठः श्रीमदुत्तरादिमठमहासंस्थानपीठाधीशः इत्यर्थः । यद्वा रूढलक्षणया मठ इति शब्देन मठभक्ताः अपि ग्राह्याः । तान् पालयति अन्नज्ञानदानादिना इत्यपि ज्ञेयं । मणति शब्दार्थं करोति इति मणः। मण–शब्दार्थे इति धातोः पदं । महान् चासौ मणश्च । "आन्महतः समानाधिकरणजातीययोः" इत्यनेन महतः आकारोऽन्तादेशः। एकस्यैव शब्दस्य नैकानर्थान् व्याकरणरीत्या बोधयतीति महामणः। एतत्तु श्रीमदाचार्यशैलीप्रवचनमेव । तदुक्तं सुमध्वविजये *"प्रत्ययप्रकृतिसंगमभङ्गीं शब्दशास्त्रविहितां प्रतिदर्श्य ।*
शुद्धधीः श्रुतिशिरःशतसिद्धानभ्यधात्सपदि विश्वपदार्थान्" इति॥

मन्युर्नाम नृसिंहः । "यजिमनिशुन्धिदसि जनिभ्यो युज्" इत्यौणादि–कयुज्प्रत्ययान्तः । तस्य मन्त्रः स्मरणं यस्य सः । मन्युसूक्तपुरश्चरणद्वारा नृसिंहप्रतिमाप्रतिष्ठापनद्वारा चेति । तथा च श्रीपादानां पूर्वाश्रमकुलदेवतापि नृसिंह इत्यपि विदितमेव । मङ्खु शीघ्रं । मम मतिं बुद्धिं मध्वमते मध्वशास्त्रे मत्तां उत्कटाम् "मत्ते शौण्डोत्कटक्षीबाः" इत्यमरः । कुर्यात् इति शेषः ।

पथ्यावक्त्रवृत्तं ।अथेदं लक्षणं–"सर्वपादेषु न स्यातां नसावाद्याक्षरात् परम्। अब्ध्यक्षरेभ्यो यगणो वक्त्रमाहुरनुष्टुभि युजोरब्धेर्जकारश्चेत् पथ्यावक्त्रमुदाहृतं" इति । "युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितं" इत्यपि वृत्तरत्नाकरे ।

Rarest Archiver

अत्रापि मकारस्य मुहुर्मुहुः वृत्तित्वात् वृत्यनुप्रासनामो शब्दालंकारः स्फुट एव।
षोडशदलपद्मबन्धे रचितोऽयं श्लोकः ।

ಮಧ್ವಶಾಸ್ತ್ರದಲ್ಲಿ ಸದಾ ಮಗ್ನರಾಗಿರುವ, ಜಗದ್ಗುರುತ್ವಸ್ಥಾನವನ್ನು ಅಲಂಕರಿಸಿ ಭೂಸುರರಿಂದ ಪೂಜಿಸಲ್ಪಡುತ್ತಿರುವ, ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾಗಿ ಸಮಸ್ತ ಸಜ್ಜನವೃಂದವನ್ನೂ ಪಾಲಿಸುತ್ತಿರುವ, ಒಂದೇ ಶಬ್ದಕ್ಕೆ ಪ್ರಕೃತಿ–ಪ್ರತ್ಯಯಗಳನ್ನು ಹಿಡಿದು, ವ್ಯಾಕರಣರೀತ್ಯಾ ಅನೇಕ ಅರ್ಥಗಳನ್ನು ಬೋಧಿಸುತ್ತಾ ಜಿಜ್ಞಾಸುಗಳ ಜ್ಞಾನತೃಷೆಯನ್ನು ತಣಿಸುತ್ತಿರುವ, ಮನ್ಯುನಾಮಕ ನೃಸಿಂಹದೇವರ ಸ್ತುತಿಯಲ್ಲಿ ರತರಾದ, ಶ್ರೀಮತ್ಸತ್ಯಾತ್ಮತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರು ಶೀಘ್ರವಾಗಿ ನನ್ನ ಬುದ್ಧಿಯನ್ನು ಮಧ್ವಶಾಸ್ತ್ರದಲ್ಲಿ ಉತ್ಕಂಠಿತವನ್ನಾಗಿ ಮಾಡಲಿ ಎಂದು ತಾತ್ಪರ್ಯ.
ಈ ಶ್ಲೋಕವು "ಷೋಡಶದಳಪದ್ಮಬಂಧ"ದಲ್ಲಿ ರಚಿತವಾಗಿದ್ದು, "ಪಥ್ಯಾವಕ್ತ್ರ"ವೃತ್ತದಲ್ಲಿದೆ.

जितं सोऽहमित्यलं जापनं भवाब्धिजं सदा
रामाङ्घ्री तिलितौ यस्मात् यतिराजं भजामि तं ॥३॥

जितमिति । सः परमात्मा अहं इति "अहं ब्रह्मास्मि" इति जापनं भाषणं वादः अद्वैतवादः, उपलक्षणतया सर्वप्रतिपक्षवादाः ग्राह्याः । जि–भाषायां इत्यतः ल्युडन्तरूपम् । येन अलं जितं । कल्याणनगर्यां दयानन्दकृष्णेत्यादिभिः स्वप्न–पदार्थसत्यत्वविषये कृतः वादः मद्पुर्यां वेंकटरमणशास्त्रिभिः पूर्वमीमांसाविषये कृतः वादोपि श्रीमत्सत्यात्मतीर्थैः सम्यक् निराकृतः इत्यत्र विद्वज्जनाः एव कृतसाक्षयः । भवः संसारः एव अब्धिः समुद्रः। तस्मिन् जायते इति भवाब्धिजं विषयसुखानां वृन्दं । येन सदा बाल्यादेव जितं । परपक्षनिराकरणपूर्वक स्वमतस्थापकत्वम् विषयवैराग्यादिगुणवत्वम् च अनेन विशेषणद्वयेन सूचितं । यस्मात् कारणात् रामस्य अङ्घ्री पादौ "पादः पदंघ्रिश्चरणः"इत्यमरः। तिलितौ स्निग्धौ तिल्–स्नेहने इत्यतः क्तप्रत्ययान्तं पदं। तस्माद्धेतोरेव जितमित्यन्वयः । तं तादृशं । यतिषु राजा श्रेष्ठः यतिराजः "राजाहःसखिभ्यष्टच्" इत्यनेन अजन्तः । तं श्रीमत्सत्यात्मतीर्थं भजामि । भज–सेवायां इत्यतः कर्तरि लट् परस्मैपदं भजामि भजावः भजामः।

युग्मविपुलावृत्तं । "युग्मयोः सप्तमो लश्चेत् सा युग्मविपुला मता"इति तल्लक्षणात् । तत्रापि प्रथमपादे चतुर्थाक्षरात् परम् रगणत्वात् रविपुलोऽयं । तदुक्तं यथा "अब्धेस्तश्चेत् तविपुला रश्चेत् रविपुला मता । भश्चेत् भविपुला प्रोक्ता नश्चेन्नविपुला मता ॥" इति । भवाब्धिजं इत्यत्र तु रूपकालंकारः ।
मुकुटबन्धे रचितोऽयं श्लोकः ।

ಬೆಂಗಳೂರುನಗರದಲ್ಲಿ ದಯಾನಂದಕೃಷ್ಣೇತ್ಯಾದಿವಾದಿಗಳನ್ನು "ಸ್ವಪ್ನಪದಾರ್ಥಸತ್ಯತ್ವ" ವಿಷಯದಲ್ಲಿ ನಿರಾಕರಣ ಮಾಡಿ, ಚೆನ್ನೈನಗರದಲ್ಲಿ ಪೂರ್ವಮೀಮಾಂಸಾ ವಿಚಾರದಲ್ಲಿ ವೆಂಕಟರಮಣಶಾಸ್ತ್ರಿಗಳನ್ನೂ ನಿರುತ್ತರರನ್ನಾಗಿಸುವ ಮೂಲಕ ಪರಮತನಿರಾಕರಣ ಪೂರ್ವಕ ಸ್ವಮತಸ್ಥಾಪನೆಯಲ್ಲಿ ದಕ್ಷರಾದ, ಹಾಗೂ ಬಾಲ್ಯದಿಂದಲೇ ಸಂಸಾರ

Rarest Archiver

ಸಮುದ್ರೋತ್ಥಿತವಾದ ವಿಷಯಸುಖಗಳ ಆಕರ್ಷಣೆಗಳನ್ನು ಗೆದ್ದು ಜಿತೇಂದ್ರಿಯರೆನಿಸಿದಂತಹ, ಸದಾ ರಾಮನ ಪಾದಗಳಲ್ಲೇ ಆಸಕ್ತವಾದ ಮನಸ್ಸುಳ್ಳ, ಆದ್ದರಿಂದಲೇ ಇಂತಹ ಗೆಲುವನ್ನು ಪಡೆದ, ಯತಿಶ್ರೇಷ್ಠರಾದ ಶ್ರೀಸತ್ಯಾತ್ಮತೀರ್ಥರನ್ನು ಭಜಿಸುತ್ತೇನೆ ಎಂದು ತಾತ್ಪರ್ಯ.

ಈ ಶ್ಲೋಕವು "ಮುಕುಟ" ಬಂಧದಲ್ಲಿ ರಚಿತವಾಗಿದ್ದು "ಯುಗ್ಮವಿಪುಲಾ" ವೃತ್ತದಲ್ಲಿದೆ.

प्रातर्वेदसुधाबोधे स्वाश्रमक्रममञ्चने
विष्ण्वंककरणे दक्षं स्वकीययमनेऽनिशं ॥४॥

प्रातरिति । प्रातः काले वेदानां ऋग्भाष्यादीनां श्रीमन्यायसुधायाश्च बोधने । स्वस्य आश्रमः सन्यासाश्रमः "ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये आश्रमः"इत्यमरः। तस्य क्रमाः आचारक्रमाः। तेषां मञ्चने पालने । मचि–धारणोच्छ्रायपूजनेषु इत्यतः ल्युडन्तं पदं मञ्चनं । तस्मिन् वर्णाश्रमोचितधर्माणां धारणे पालने च इत्यर्थः । विष्णोः अङ्कौ चिह्नौ शङ्खचक्रौ तयोः करणं यस्मिन् तत् कर्म तप्तमुद्राधारणमिति यावत् । तस्मिन् । स्वकीयानाम् यमनं ज्ञानप्रदानं यम–ज्ञानादिषु इति धातोः रूपं तस्मिन् । अनिशं प्रत्यहं । दक्षः समर्थः तं श्रीमत्सत्यात्मतीर्थं भजामीति पूर्वेणान्वयः। अनेन श्रीपादानां आह्निककर्माणि सूचितानि । पथ्यावक्त्रवृत्तं । उक्तं च लक्षणं ।

शरबन्धे रचितोऽयं श्लोकः ।

ಪ್ರತಿನಿತ್ಯವೂ, ಪ್ರಾತಃಕಾಲದಲ್ಲಿ ಋಗ್ಭಾಷ್ಯಶ್ರೀಮನ್ನ್ಯಾಯಸುಧಾದಿ ಪ್ರೌಢಗ್ರಂಥಗಳ ಬೋಧನೆಯಲ್ಲಿ, ಹಾಗೇಯೇ ಸನ್ಯಾಸಾಶ್ರಮದ ಕಠಿಣ ಆಚರಣೆಗಳನ್ನು ನಿಷ್ಠವಾಗಿ ಪಾಲಿಸುವುದರಲ್ಲಿ, ವಿಷ್ಣುಚಿಹ್ನೆಗಳಾದ ಶಂಖಚಕ್ರಗಳನ್ನು ತಪ್ತಮುದ್ರಾಧಾರಣೆಯ ಮೂಲಕ ಇತ್ತು ಭಕ್ತರನ್ನು ಪಾವನಗೊಳಿಸುವುದರಲ್ಲಿ, ತಮ್ಮ ಅನುಗ್ರಹಸಂದೇಶದ ಮೂಲಕ ಸ್ವೀಯಜನರಿಗೆ ಜ್ಞಾನಾಮೃತವೀಯುವುದರಲ್ಲಿ ಅತ್ಯಂತ ಸಮರ್ಥರಾದ ಶ್ರೀಸತ್ಯಾತ್ಮತೀರ್ಥರನ್ನು ನಾನು ಭಜಿಸುತ್ತೇನೆ ಎಂದು ತಾತ್ಪರ್ಯ.

(ಇಲ್ಲಿ ಶ್ರೀಪಾದಂಗಳವರ ಆಹ್ನಿಕ ಆಚರಣೆಗಳನ್ನು ಸೂಚಿಸಲಾಗಿದೆ)

ಈ ಶ್ಲೋಕವು "ಶರಬಂಧ"ದಲ್ಲಿ ರಚಿತವಾಗಿದ್ದು, "ಪಥ್ಯಾವಕ್ತ್ರ" ವೃತ್ತದಲ್ಲಿದೆ.

हिमांशोर्मोदने शोभा भास्करी तमसोऽदने
नेह लब्धसमा गृह्यात् निजदासकुलेऽपि मां ॥५॥

हिमांशोरिति । यस्य श्रीसत्यात्मतीर्थस्य शोभा कान्तिः। मोदने सुजनानां आनन्दकरणे । हिमांशोः चन्द्रस्य"हिमांशुश्चन्द्रमाश्चन्द्रः"इत्यमरः 'शोभा कान्तिः। तमसः अज्ञानान्धकारस्य अदने निवारणे अद–भक्षणे इत्यतः रूपं । भास्करी शोभा सूर्यप्रकाशः । अत एव इह जगति न लब्धसमा । लब्धा समा सदृशा "समस्तुल्यः सदृशः"इत्यमरः यया सा । एवं लब्धसमा न इति । श्रीपादानां कीर्तिसमा अन्या कीर्तिः कुत्रापि अदृष्टः इति भावः । अद्वितीया इति यावत् ।

Rarest Archiver

तादृशः श्रीसत्यात्मतीर्थः मामपि निजदासकुले स्वकीयशिष्यवृन्दे गृह्णात् स्वीकुर्यात् । ग्रह–उपादाने इत्यतः कर्तरि आशीर्लिङ् परस्मैपदं । अनेन सूर्यप्रकाशदृष्टान्तेन अज्ञाननाशकत्वोक्त्या अनिष्टपरिहारकत्वं चन्द्रप्रकाशदृष्टान्तेन आनन्दप्रदत्वोक्त्या इष्टप्रापकत्वं च उक्तं भवति । तेन च महागुरुत्वम् ज्ञापितमिति । वृत्तं तु प्थ्यावक्त्रं ।

अत्र हिमांशुशोभाश्रीपादशोभयोः तथा भास्करशोभाश्रीपादशोभयोः साधर्म्यादभेदारोपत्वात् अनुभयाभेदो नाम रूपकः। अपि च न लब्धसमा इत्यत्र अनन्वयालंकारः । *धनुर्बन्धे रचितोऽयं श्लोकः ।*

ಯಾವ ಶ್ರೀಸತ್ಯಾತ್ಮತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರ ಕಾಂತಿಯು(ಕೀರ್ತಿಯು) ಸಜ್ಜನರಿಗೆ ಆನಂದವನ್ನುಂಟುಮಾಡುವುದರಲ್ಲಿ ಚಂದ್ರನ ಬೆಳದಿಂಗಳಿನಂತಾಗಿ, ಅಂಧಕಾರವನ್ನು ಓಡಿಸುವುದರಲ್ಲಿ ಸೂರ್ಯನ ಪ್ರಖರಕಾಂತಿಯಂತಾಗಿ ಶೋಭಿಸುತ್ತದೆಯೋ, ಆದ್ದರಿಂದಲೇ ಈ ಜಗತ್ತಿನಲ್ಲೇ ಅಸದೃಶವಾದದ್ದೂ, ಅದ್ವಿತೀಯವಾದದ್ದೂ ಆಗಿದೆಯೋ ಅಂತಹ ಶ್ರೀಪಾದಂಗಳವರು ತಮ್ಮ ಶಿಷ್ಯವೃಂದದಲ್ಲಿ ನನ್ನನ್ನೂ ಸ್ವೀಕರಿಸಲಿ ಎಂದು ತಾತ್ಪರ್ಯ.

(ಇಲ್ಲಿ ಸೂರ್ಯನ ಉದಾಹರಣೆಯಿಂದ ತಮೋನಾಶಕತ್ವವನ್ನು ಹೇಳುವ ಮೂಲಕ ಅನಿಷ್ಟ ಪರಿಹಾರಕತ್ವವನ್ನೂ, ಚಂದ್ರನ ದೃಷ್ಟಾಂತದಿಂದ ಆನಂದ ಪ್ರದತ್ವವನ್ನು ಹೇಳುವ ಮೂಲಕ ಇಷ್ಟಪ್ರಾಪಕತ್ವವನ್ನೂ ಸೂಚಿಸಲಾಗಿದೆ)

ಈ ಶ್ಲೋಕವು "ಧನುರ್ಬಂಧ"ದಲ್ಲಿ ರಚಿತವಾಗಿದ್ದು, "ಪಥ್ಯಾವಕ್ತ್ರ" ವೃತ್ತದಲ್ಲಿದೆ.

–*–*–*–*–

स्तोत्रसन्नहनं भद्रं श्रीसत्यात्मपदांकितं ।
पायात् सर्वदा सुधरं गुर्वनुग्रहकांक्षिणं ॥

स्तोत्रेति। स्तोत्रसन्नहनं एतत्स्तोत्ररूपकवचं । श्रीमत्सत्यात्मतीर्थानां पदेन नाम्ना अंकितं चिह्नितं । अत एव भद्रं दृढं मंगलकरं । मां पायात् । पा–रक्षणे इति धातोः आशीर्लिङ् परस्मैपदं । कीदृशं मां । सर्वदा नित्यं सुधरं । सुष्ठु धरतीति सुधरः तं । एषां स्तुतिं भक्त्या धृतवन्तं । गुरोः श्रीपादानां अनुग्रहस्य कांक्षी तादृशं मां पातु ।

वृत्तं तु युग्मविपुला । उक्तं च लक्षणं । अत्र तृतीयपादे भगणत्वात् भान्त्यविपुलोऽयं ।

ಈ ಐದು ಶ್ಲೋಕಗಳಿಂದ ಕೂಡಿದ ಸ್ತುತಿಯ ಕವಚವು, ಶ್ರೀಮತ್ಸತ್ಯಾತ್ಮತೀರ್ಥರ ಪದದಿಂದ ಚಿಹ್ನಿತವಾದದ್ದೂ, ಆದ್ದರಿಂದಲೇ ಮಂಗಳಕರವಾದದ್ದೂ ಆಗಿದೆ. ಗುರುಗಳ ಅನುಗ್ರಹಾಕಾಂಕ್ಷಿಯಾಗಿ ಸದಾ ಭಕ್ತಿಯಿಂದ ಸ್ತೋತ್ರಕವಚವನ್ನು ಧರಿಸಿರುವ ನನ್ನನ್ನು ಈ ಸ್ತುತಿಯು ರಕ್ಷಿಸಲಿ ಎಂದು ತಾತ್ಪರ್ಯ.

–*–*–*–*–*–*–*–*–*–*–*–*–

Rarest Archiver

हारबन्धः



श्रीशं केशं भृशं दिग्विजयजलजनेत्रालयं लब्धलङ्कं
रामं धीमंतमंशुप्रकरकलिकविं हासदासप्रसन्नं ।
न्यूनाज्ञानाप्तनारायणगुणगणभान् व्यासमासन्नसत्या-
त्मो भूयात् भूरिभूतिप्रदहृदयदयो लोपतापप्रपन्ने ॥१॥

Rarest Archiver

षोडशदलपद्मबन्धः



मध्वमग्नो महीमह्यो मठमण्ठो महामणः
मन्युमन्त्रो मतिं मड्खु मत्तां मध्वमते मम ॥२॥

Rarest Archiver

मुकुटबन्धः



जितं सोऽहमित्यलं जापनं भवाब्धिजं सदा
रामाङ्घ्री तिलितौ यस्मात् यतिराजं भजामि तं ॥३॥

Rarest Archiver

शरबन्धः



प्रातर्वेदसुधाबोधे स्वाश्रमक्रममञ्चने
विष्णवंककरणे दक्षं स्वकीययमनेऽनिशं ॥४॥

Rarest Archiver

धनुर्बन्धः



हिमांशोर्मोदने शोभा भास्करी तमसोऽदने
नेह लब्धसमा गृह्यात् निजदासकुलेऽपि मां ॥५॥

Rarest Archiver

विघ्नध्वान्तनिवारणैकतरणिः विघ्नाटवीहव्यवाट्
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुंगगिरिप्रभेदनपविः विघ्नाब्धिकुंभोद्भवः
विघ्नाघौघघनप्रचंडपवनः पायात् प्रसादो गुरोः ॥

–श्री श्रीनिवासतीर्थ

Rarest Archiver

विघ्नध्वान्तनिवारणैकतरणिः विघ्नाटवीहव्यवाट्
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुंगगिरिप्रभेदनपविः विघ्नाब्धिकुंभोद्भवः
विघ्नाघौघघनप्रचंडपवनः पायात् प्रसादो गुरोः ॥

–श्री श्रीनिवासतीर्थाः

Rarest Archiver